पौराणिक काल परिज्ञानम्

पं० रामचन्द्रपाठकः
ज्योतिषशास्त्राचार्यः
शोधसहायक, यू० जी० सी० प्रोजेक्ट
ज्योतिषविभाग का० हि० वि० वि०

शारदा प्रकाशन
अस्सी, वाराणसी
१९८६

प्रकाशक :

शारदा प्रकाशन

अस्सी, वाराणसी

प्रथम संस्करण, १९८६

प्रमुख वितरक

किशोर विद्या निकेतन

भदैनी, वाराणसी

मूल्य : १५.००

मुद्रक :

जगन्नाथ प्रिंटर्स

बी० ३१/५३ भोगावीर, वाराणसी

भूमिका

विघ्नेश्वरं नमस्कृत्य मुनि द्वैपायनं तथा।
पुराणमतमाश्रित्य क्रियते कालसंग्रहः ।।

काल की महिमा समस्त संसार में व्याप्त है। भगवान् भास्कराचार्य ने लिखा है—

वेदास्तावद् यज्ञकर्म प्रवृत्ताः यज्ञास्तावतकालाश्रयेण।
शास्त्रादस्मात् कालबोधो यतः स्याद् वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात् ।।

अर्थात् यज्ञ यागादिक कार्य से लेकर मनुष्य के आह्निक कार्यों में काल की कितनी आवश्यकता है यह सर्वविदित है। धार्मिक कार्यों में पुराणों का कितना महत्व है, इसको भी हम सभी अच्छी तरह से जानते हैं। किसी भी पर्व त्योहार के विषय में जब कोई मतभेद होता है तो निर्णय के लिए धर्मशास्त्रीय तथा दैवज्ञ बन्धुओं को पुराण का ही आश्रय लेना पड़ता है। पुराणों में काल का वर्णन मूर्त तथा अमूर्त रूप में प्रतिपादित है। यद्यपि त्रुट्यादि अत्यन्त सूक्ष्म होने के कारण व्यवहारोपयोगी नहीं होते किन्तु अमूर्तकाल की आवश्यकता सभी को किसी न किसी प्रकार पड़ती ही रहती है। सूर्यसिद्धान्त आदि ग्रन्थों में जो कल्पादि के मान हैं उनसे भगवान मनु के वचनों से अन्तर दिखाई देता है। इसलिए प्रश्न होता है कि सूर्यसिद्धान्त आदि ज्योतिष ग्रन्थों से धर्मशास्त्र के कालमान में अन्तर क्यों है?

इसका समाधान यह है कि आर्षोक्त ज्योतिषसिद्धान्तग्रन्थों में जो काल के मान प्रतिपादित हैं वे सन्ध्या-सन्ध्यांश सहित हैं किन्तु भगवान् मनु के प्रतिपादित जो कल्पादि के मान हैं वे ज्योतिष के सिद्धान्तोक्त सूर्यसिद्धान्तादि मानों में सन्ध्या-सन्ध्यांश को घटाने से पौराणिक तथा धर्मशास्त्रीय ग्रन्थों से तुल्य ही होते हैं। उदाहरण स्वरूप एक चतुर्युग का मान १२ हजार दिव्य वर्ष कहा गया है। इसी का षष्ठांश ($\frac{1}{6}$) यदि बारह हजार में से घटा दिया जाय तो अवशिष्ट १० हजार दिव्य वर्ष मनु के चतुर्युग के मान के बराबर हो जायेगा। धर्मपाद-व्यवस्था के अनुसार सूर्यसिद्धान्तोक्त सभी मन्वन्तरों कल्पों युगों के मान में इनका षष्ठांश ($\frac{1}{6}$) यदि घटा दिया जाय तो पौराणिक तथा धर्मशास्त्रीय मतों से सर्वतोभावेन एकरूपता ही सिद्ध होगी। अस्तु

इस पुस्तिका के संग्रह कार्य में पूज्य गुरुवर पं० राम जन्म मिश्र अध्यक्ष, ज्योतिष विभाग, का० हि० वि० से विशेष प्रेरणा मिली है जिसके फलस्वरूप यह एक लघु पुष्प सज्जनों के कर कमलों में सादर समर्पित किया गया है। इसके मनन से ज्योतिष सिद्धान्त तथा पौराणिक वचनों में जो मतभेद है उसका निराकरण आसानी से सम्भव है।

बसन्त पञ्चमी
१३-२-१९८६

विदुषामाश्रव :—
पं० रामचन्द्र पाठक

पौराणिक काल परिज्ञानम्

कालपरिमाणविवरणम्

पुराणेषु कालमानस्य विवेचनं महत्या वैज्ञानिकपद्धत्या कृतं वर्तते। कालमानस्य प्रतीकरूपेण काष्ठा-निमेष-कला-मुहूर्त-अहोरात्र-मास-अयन-वर्ष-युग-मन्वन्तर-कल्पानां पारिभाषिकनाम्नां विचारो जातोऽस्ति। काल-परिमाणविवरणं हि प्रायः प्रतिपुराणं प्रचुरमात्रायामुलभ्यते। तथाहि—

काष्ठा पञ्चादशाख्याता निमेषा मुनिसत्तम।
काष्ठास्त्रिंशत्कला त्रिंशत्कला मौहूर्तिको विधिः॥
तावत्संख्यैरहोरात्रं मुहूर्तैर्मानुषं स्मृतम्।
अहोरात्राणि तावन्ति मासः पक्षद्वयात्मकः॥
तैः षड्भिरयनं वर्षं द्वेऽयने दक्षिणोत्तरे।
अयनं दक्षिणं रात्रिर्देवानामुत्तरं दिनम्॥
चतुर्युगं द्वादशभिस्तद्विभागं निबोध मे।
दिव्यैर्वर्षसहस्रैस्तु कृतत्रेतादिसंज्ञितम्॥
प्रोच्यते तत्सहस्रं च ब्रह्मणो दिवसं मुने।
ब्रह्मणो दिवसे ब्रह्मन्! मनवस्तु चतुर्दश॥
ब्राह्मो नैमित्तिको नाम तस्यान्ते प्रतिसंचरः। — वि. पु. १।३८-२२

मानवानामक्षिपक्ष्मनिपतने यावान् समयो व्यत्येति तावान् समयो निमेष उच्यते। १५ निमेषाणामेका काष्ठा भवति, ३० काष्ठानामेका कला भवति, ३० कलानामेकं मुहूर्तं भवति, ३० मुहूर्तैरेकमहोरात्रं भवति, ३० अहोरात्रैः द्वौ पक्षौ भवतः, द्वयोः पक्षयोरेको मासो भवति, ६ मासानामेकमयनं भवति, तद्द्विविधमुत्तरायणं दक्षिणायनं

इदं दृश्यं जगत् कैः कैः तत्त्वैर्निर्मितं विद्यते, तेषां किमस्ति पौर्वापर्यम्, सृष्टेरुत्पत्तिः कदाऽभूत्, प्रलयः कदा भविष्यति, कथं च भविष्यतीत्यादीनां रहस्यात्मकानां प्रश्नानां सन्तोषजनकं वास्तविकमुत्तरमुपलब्धुं पुराणानामेव पारायण कर्तव्यं भविष्यति।

मन्वन्तरम्

मन्वन्तरं नाम दैवराज्ये नानापरिवर्तनकारकः कालविशेषः। श्रीमद्भागवते मनोः मनुपुत्राणाम्, देवानामिन्द्रस्य, ऋषीणाम्, अंशावताराणाञ्च घटनाया उल्लेख इति षड्विधं मन्वन्तरं प्रोक्तमस्ति—

मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः।
ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते ॥ = १२।७।१५

यदि मन्वन्तरज्ञानं न स्यात्तर्हि हिन्दूनामितिहासे महती अव्यस्था समुपतिष्ठेत। स्वायम्भुवमनोः समये के ऋषयः केच राजान आसन्, क इन्द्रः कश्च विष्णोरवतारो जातः? स्वरोचिषस्य मनोः के के सहायका आसन्? उत्तमस्य मनोः समये कस्य पुराणस्य प्राधान्यमासीत् रैवतमनुकाले कीदृशी व्यवस्था आसीदित्यादिप्रश्नानां यथार्थमुत्तरं पुराणैर्विना कोऽपि दातुं न शक्नुयात्। मन्वन्तरज्ञानमन्तरा कस्यापि ऋषेः राज्ञो वा कालस्य कथं यथार्थं ज्ञानं भविष्यति? एकस्मिन् कल्पे १४ मनवो भवन्ति, केन मनुना का स्मृतिः रचिता, तस्य स्त्रियाः किन्नामासीत् कियन्तश्चासन् तस्य तनयाः? इत्यादि ज्ञानं मन्वतर विना न भवितुमर्हति। पुराणानुसारं सृष्टिकालादारभ्य प्रलयपर्यन्तं प्रायः चतुरर्बुदादधिक एव समयो व्यत्येति। एतावति महति समये का घटना कदाऽजीघटत्? कस्य प्रादुर्भावः कदाऽजायतेत्यादि रहस्यं ज्ञातुं भगवता व्यासेन महर्षिणा मन्वन्तरपद्धतेराविष्कारः कृतः।

शंका—वहवो विदेशीया विद्वांसः समये समये संदिहन्ते यत् हिन्दूनामितिहासे न कुत्रापि जन्मसंवदुल्लेखो विद्यते, नापि विशेष घटनानां समयो निर्दिष्टोऽस्ति, अतो भारतीयेतिहासोऽनुपयुक्तोऽन्धकारमयश्चास्ति।

समीक्षा–द्विसहस्रवर्षमात्रे इतिहासे ईशामाध्यमेन जन्मतिथेरुल्लेखो भवितुमर्हति, किन्तु अतिविशाले चतुरर्बुदवर्षमिते इतिहासे ईशासमाः अनेके उत्पन्ना अतोऽकिञ्चित्करीमिमां पद्धतिमनुपयुक्तां मत्वा त्रिकालदर्शिना महर्षिणा वेदव्यासेन समाधिना मन्वन्तरप्रणाली समाश्रिता। किञ्च ईशाविषयेऽप्ययं निश्चयो नास्ति यदयं सृष्टेः कियद्वर्षानन्तरं जातः ? तर्हि एतस्य माध्यमेन कालविभागस्य किं मूल्यमस्ति ? अपिच किम् ईशावर्षमेव प्रलयप्रर्यन्तं प्रचलिष्यति ? लक्षवर्षाणां वार्ता तु दूरे तिष्ठतु, पञ्चसहस्रवर्षपूर्वं प्रचलितो यौधिष्ठिरः सम्वत्सरो न सर्वैरिदानीं ज्ञायते, तर्हि ईशासम्वत्सरः सदा चलिष्यत्येवेत्यत्र कोऽस्ति निश्चयः ? संभाव्यते चाचिरमेव स्वतन्त्रे भारते कदाचिदीशासम्वत्सरःस्थगितः स्यात्। अतोऽस्माकं पूर्वजैः किञ्चदनिश्चतमुपायममत्वा प्रत्येकं सिद्धान्तं सुनिश्चते सीम्नि समुपस्थापयन्ति। यथा घटिकायां द्वादशभिः चिन्हैः एकस्य दिनस्य २४ घटिकासमयज्ञानस्य व्यवस्था कृताऽस्ति तथैव पुराणेषु एकस्य कल्पस्य दीर्घसमयज्ञानाय १४-मन्वन्तरमाध्यमेन व्यवस्था कृताऽस्ति। अतः सृष्टिकालतः प्रलयपर्यन्तं घटनाज्ञानाय मन्वन्तरपद्धतेराविष्कारः सर्वथोपयोगी युक्तियुक्तश्चास्ति।

यदि मन्वन्तरमानेन केवलमिदमेव ज्ञातुं शक्यते यद् अमुकमन्वन्तरस्यामुकयुगे इयं घटनाऽजीघटत् तर्हि पाश्चात्यपद्धत्याऽपि केवलमिदमेव ज्ञायते यत् अमुकघटना इयद्वर्षपूर्वं परं वाऽजायत। पाश्चात्यपद्धतौ अपि मास-तिथि-घटना-पलप्रतिपलानां तु ज्ञानं भवत्येव नहि।

यथा अल्पीयसि द्विसहस्रात्मके काले केवलं वर्षज्ञानमेव पर्याप्तं भवति तथैव चतुरर्बुदवर्षाणामितिहासे केवलं मन्वन्तरमात्रं युगज्ञानं वा कथं न पर्याप्तं स्यात् तस्मात् यथा पाश्चात्यपद्धतौ तिथि-घटी-क्षण-पल-विपलादीनां ज्ञानमन्तरापि न कापि हानिर्भवति, तथैव मन्वन्तरपद्धतावपि वर्षज्ञानं विनापि न कापि क्षतिर्भवितुमर्हति। अतएवोक्तमभियुक्तैः—

यश्चोभयोः समो दोषः परिहारोऽपि तादृशः।
नैकः पर्यनुयोक्तव्यः तादगर्थविचारणे॥

द्विसहस्रायुष्मत्याः पाश्चात्यजातेः अर्बुदवर्षायुष्मत्याः हिन्दूजातेश्च गणनायामेतावदन्तरं स्वाभाविकमस्ति। अतो यदि पाश्चात्यपद्धतौ केवलं वर्षज्ञानं पर्याप्तं वर्तते तर्हि अर्बुदवर्षात्मके हिन्दूनामितिहासे मन्वन्तरयुगज्ञानमेवकथनं पर्याप्तं प्रतीयते।

पुराणेषु या गाथा यानि चरित्राणि याश्च ऐतिहासिकघटना वर्ण्यन्ते, तासां सर्वासां स्वरूपं समाधियोगेन समाधिगम्यत्रिकालदर्शी महर्षिः व्यासो लोककल्याणाय वर्णितवान्। पुराणेषु प्रतिपादिता देवपदाधिकारिणां देवानां च गाथा सृष्टिसम्बन्धेनास्माकं परमोपयोगिनी वर्तते।

दैवे जगति मनुपदमेकमत्यन्तमहत्वपूर्णं पदमास्ते, तत् खलु प्रतिमन्वन्तरं परिवर्तते।

यथाऽस्मिन् मर्त्यलोके राज्ञाम्परिवर्तने अनेकविधं परिवर्तनमुपजायते, तथैव प्रतिमन्वन्तरं देवलोकमृत्युलोकयोः सभ्यतास्वरूपं तच्छृङ्खलाविधानम्, तच्छासनपद्धतिश्चेति सर्वं परिवर्तते। यथास्मिन् लोके एक-द्वि-त्रि-चतुः-पञ्चशतवर्षेषु सभ्यता-सदाचारादीनां परिवर्तनं दृश्यते, तथैव प्रतिमन्वन्तरं मनोः परिवर्तनेन साकं देवराज इन्द्रः अन्ये महान्तो देवपदाधिकारिणो नित्यर्षयः पितरश्च परिवर्तन्ते। एवञ्च प्रतिमन्वन्तरं मनुरिन्द्रः ऋषयः-देवता-राजानश्च परिवर्तन्ते

तथा तेषां स्थानेषु नवा-नवा अधिकारिण उपविशन्ति। तथा चोक्तम् —

> सप्तर्षयः सुराः शक्रो मनुस्तत्सूनवो नृपाः।
> एककाले हि सृज्यन्ते संह्रियन्ते च पूर्ववत् ॥ वि० पु० १।३।१७

अतः प्रतिमन्वन्तरं जीवानां शक्तौ, ज्ञाने, दैवजागतिकशृङ्खलादौ च महत् परिवर्तनमुपजायते। प्रतिमन्वन्तरं देवाः कर्मचालकाः ऋषयो ज्ञानसञ्चालकाः पितरश्च स्थूलभूतसञ्चालका भवन्ति। तेषामधस्तादनेके लघीयांसो देवपदाधिकारिणो भवन्ति, यथैकस्मिन् साम्राज्ये सम्राट् माण्डलिकादयश्च कार्यकारिणः पृथक् पृथक् भवन्ति, तथैव दैवराज्ये इन्द्रेण सह अनेकेषां देवपदाधिकारिणां सम्बन्धो भवति। प्रतिमन्वन्तरं यदा दैवी शृङ्खला परिवर्तते, तदा सृष्टेः बहवोंऽशाः, देवराजस्यानेका व्यवस्था अपि परिवर्तनं प्राऽप्नुवन्ति। प्रतिमन्वन्तरं यद् ज्ञानतारतम्यमुपलभ्यते, तत् तात्कालिकानां देवर्षिगणानां परिवर्तनमूलकमेवास्ति।

त्रिकालदर्शी महर्षिर्व्यासः ऋतम्भरप्रजया मन्वन्तरीयाः कल्पान्तरीयाश्च गाथाः संकलय्य लोककल्याणहेतवे पुराणेषु प्रकाशयाञ्चकार। अतो नासां लौकिकैरितिहासैः सर्वांशेन सम्बन्धो भवितुमर्हति। किं बहुना यदा इदानीमपि शतवार्षिके सहस्राब्दिके वा काले लौकिकेतिहासे देशकालपात्राणां सभ्यतायाः संस्कृतेश्च महत् परिवर्तनमवलोक्यते, तदा अनेकमन्वन्तरीये कल्पान्तरीये च विपुले काले कियत् परिवर्तनं भवितुमर्हतीति विद्वद्भिः स्वयमेव विचारणीयम्।

दैवराज्यस्य प्रधानतया त्रीणि कार्याणि सन्ति (१) कालव्यवस्था (२) कर्मशृङ्खला (३) पदाधिकारिणां सुव्यवस्था च। तत्र कालव्यवस्थापको राजा मनुरभिधीयते, कर्मफलदानेन सह जीवानां नियामको

धर्मराजो विद्यते। अनेकविधानां देवपदाधिकारिणां प्रतिष्ठापको देवसत्वसुरक्षको देवराज इन्द्र उच्यते। जीवानां गमनागमनचक्रस्य नियामका अपरेऽपि अनेके देवाः तत्तत् पदेषु प्रतिष्ठिताः सन्ति।

यथाऽस्मिन् मृत्युलोके राजा, प्रजाः, राज्यशक्तिः, प्रजाशक्तिः, देशकालपात्राणां स्वरूपं च पृथक्-पृथक् प्राप्यते, तथैव प्रतिमन्वन्तरं विभिन्नप्रकारको देवर्षिपितृसङ्घो जायते। तस्मात् प्रतिमन्वन्तरं देवराजस्य देवपदानाञ्च शृङ्खलायामवश्यं महान् भेदो भवितुमर्हति। मन्वन्तरपरिवृत्तौ मनुपदेऽन्यो मनुः प्रतिष्ठितो भवति तत्सहायकाश्च परिवर्तन्ते। इमं कालपरिमाणं निरीक्ष्य बुद्धिमन्तो विद्वांस इदमवधारयन्ति यदेतस्मिन् महति काले बहु परिवर्तनं भवति। पदार्थविद्यावेदिनस्त्विदमामनन्ति यत् द्विसहस्रवर्षानन्तरं प्रस्तरगृहादीनामपि न कापि सत्ता स्थातुमर्हति। एतावता महता कालेन सर्वत्र वननदीप्रभृतिषु बहुविधं परिवर्तनं भवति।

ब्रह्मण एकस्मिन् दिने (कल्पे चतुर्दश मन्वन्तराणि सहस्रसंख्याका महायुगाश्च भवन्ति। चतुर्णां सत्य-त्रेता-द्वापर-कलियुगानामेको महायुगो भवति। एको महायुगो देवानां द्वादशसहस्रवर्षाणां भवति। यथैकस्मिन् दिने प्रातः सन्ध्याकालः सायं सन्ध्याकालश्च भवति, तथैव प्रतियुगं युगस्यारम्भे सन्ध्याकालः अन्ते च सन्ध्यांशकालोऽपि भवति। तत्र चतुःसहस्रदिव्यवर्षाणां सत्ययुगः, चतुःशतानि वर्षाणि सन्ध्या, पश्चात्तावानेव सन्ध्यांशश्च भवति। त्रिसहस्रदिव्यवर्षाणां त्रेतायुगम्; शतत्रयवर्षाणां सन्ध्या सन्ध्यांशश्च। द्विसहस्रवर्षाणां द्वापरयुगम्; द्विशतवर्षाणां सन्ध्या सन्ध्यांशश्च भवति। एवमेकसहस्रदिव्यवर्षात्मकं कलियुगम्, पूर्वं शतवर्षात्मिका सन्ध्या पश्चात् शतवर्षात्मकः सन्ध्यांशश्च भवति। एवं संकलनया द्वादशसहस्रवर्षाणाम् एकं चतुर्युगं भवति। तथा चोक्तं मार्कण्डेयपुराणे—

दिव्यैर्वर्षसहस्रैस्तु कृतत्रेतादिसंज्ञितम् ।
चतुर्युगं द्वादशभिः तद्विभागं श्रृणुष्व मे ॥
चत्वारि तु सहस्राणि वर्षाणां कृतमुच्यते ।
शतानि सन्ध्या चत्वारि सन्ध्यांशश्च तथाविधः ॥
त्रेता त्रीणि सहस्राणि दिव्याब्दानां शतत्रयम् ।
तत्सन्ध्या तत्समा चैव सन्ध्यांशश्च तथाविधः ॥
द्वापरं द्वे सहस्रे तु वर्षाणां द्वे शते तथा ।
तस्य सन्ध्या समाख्याता द्वे शताब्दे तदंशकः ॥
कलिः सहस्रं दिव्यानामब्दानां द्विजसत्तम ! ॥
सन्ध्या सन्ध्यांशकश्चैव शतकौ समुदाहृतौ ।
एषा द्वादशसाहस्री युगाख्या कविभिः कृता ॥
एतत् सहस्रगुणितम् अहर्ब्राह्ममुदाहृतम् ।
ब्रह्मणो दिवसे ब्रह्मन् मनवः स्युश्चतुर्दश ।—४६।८२-२३

दिव्यवर्षविवरणम्—

	कालः	सन्ध्या	सन्ध्यांशः	योगः
सत्ययुगस्य	४०००	४००	४००	४८००
त्रेतायुगस्य	३०००	३००	३००	३६००
द्वापरयुगस्य	२०००	२००	२००	२४००
कलियुगस्य	१०००	१००	१००	१२००
संकलनम्				१२००

मनुष्याणामेकं वर्षं देवानामेकं दिनं भवति । एवं मानवीय ३६० वर्षाणां देवानामेकं वर्षं भवति । तच्च दिव्यं वर्षं कथ्यते । द्वादशसहस्रदिव्यवर्षात्मके काले दशसहस्रैः गुणनं कृत्वा पुनः ३६० गुणणेन मनुष्यवर्षाणि सिद्धयन्ति । तथाहि एकस्मिन् कल्पे—१२००० ×

१००० = १२००००० देववर्षाणि १२००००० × ३६० = ४३२०००००० मानववर्षाणि भवन्ति ।

मानववर्ष विवरणम्

	मानववर्षाणि	सन्ध्या	सन्ध्यांशः	योगः
सत्ययुगम्	१४४००००	१४४०००	१४४०००	१७२८०००
त्रेतायुगम्	१०८००००	१०८०००	१०८०००	१२९६०००
द्वापरयुगम्	७२००००	७२०००	७२०००	८६४०००
कलियुगम्	३६००००	३६०००	३६०००	४३२०००

त्रिंशत्कोट्यस्तु सम्पूर्णाः संख्याताः संख्यया द्विज ।
सप्तषष्ठि तथान्यानि नियुतानि महामुने ! ।।
विंशतिस्तु सहस्राणि कालोऽयमधिकं विना ।
मन्वन्तरस्य संख्येयं मानुषैर्वत्सरैर्द्विज ! ।। = १।३।२०।२१

इति विष्णुपुराणवचनानुसारं प्रत्येकमन्वन्तरस्य कालः मानवीय ३०६७२०००० वर्षात्मको भवति । तत्र वैक्रमीयसंवत् २०३० पर्यन्तं वर्तमानस्य सप्तमस्य वैवस्वतनाम्नो मन्वन्तरस्य १२०५३५०८६ वर्षाणि व्यतीतानि, १८६१८४९१४ वर्षाणि चावशिष्टानि सन्ति ।

चतुर्दश मनूनां नामानि

मन्वन्तरस्य वर्णनं तु प्रायः सर्वेषु पुराणेषु विद्यते । तत्र विष्णुपुराणे चतुर्दश मनूनां नामानि एवं निर्दिष्टानि सन्ति–(१) स्वायम्भुवमनुः (२) स्वारोचिषमनुः (३) उत्तममनुः (४) तामसमनुः (५) रैवतमनुः (६) चाक्षुषमनुः (७) वैवस्वतमनुः (८) सावर्णिकमनुः (९) दक्षसावर्णिकमनुः (१०) ब्रह्मसावर्णिकमनुः (११) धर्मसावर्णिकमनुः (१२) रुद्रसावर्णिकमनुः (१३) रुचिर्मनुः (१४) भौममनुः । तथाहि—

स्वायंभुवो मनुः पूर्वः मनुः स्वारोचिषस्तथा ।
उत्तमस्तामसश्चैव रैवतश्चाक्षुषस्तथा ।।
षडेते मनवोऽतीताः साम्प्रतं तु रवेः सुतः ।
वैवस्वतोऽयं यस्यैत त्सप्तमं वर्ततेऽन्तरम् ।।
सावर्णिस्तु मनुर्योऽसौ मैत्रेय ! भविताऽष्टमः ।
नवमो दक्षसावर्णिर्भविष्यति मुने ! मनुः ।।
दशमो ब्रह्मसावर्णिर्भविष्यति मनुः मुने ! ।
एकादशस्तु भविता धर्मसावर्णिको मनुः ।।
रुद्रपुत्रस्तु सावर्णिर्भविता द्वादशो मनुः ।
त्रयोदशो रुचिर्नाम भविष्यति मुने ! मनुः ।।
भौमश्चतुर्दशश्चात्र मैत्रेय ! भविता मनुः ।। = ३।१।९।४०

मनूनां परिचयः

श्रीमद्भागवतानुसारं मरीच्यादिद्वारा सृष्टेर्विस्तारमदृष्टवा एकदा मनसि चिन्तयतो ब्रह्मणः शरीरतः युग्मौ स्त्री-पुरुषौ आविर्भूतौ । तत्र यः पुरुष आसीत् स सार्वभौमसम्राट् स्वायम्भुवमनुनाम्ना प्रसिद्धः । या च स्त्री आसीत् सा तस्य महाराज्ञी शतरूपाऽभवत्—

कस्य रूपमभूद्द्वेधा यत् कायमभिचक्षते ।
ताभ्यां रूपविभागाभ्यां मिथुनं समपद्यत ।।
यस्तु तत्र पुमान् सोऽभून् मनुःस्वायम्भुवः स्वराट् ।
स्त्रीर्यासीच्छतरूपाख्या महीष्यस्य महात्मनः ।। = ३।१२।५२।५३

तत्कालादेव स्त्रीपुरुष सम्भोगद्वारा प्रजावृद्धिः समारब्धा । स्वायभुवमनोः शतरूपायां पञ्च सन्ततयः समुत्पन्नाः, येषु प्रियव्रतोत्तानपादौ द्वौ पुत्रौ आस्तां तथा आकूतिः देवहूतिः प्रसूतिश्चेति तिस्रः कन्या आसान् । मनुना आकूतेः विवाहः प्रजापतिना रूचिना सह कृतः,

देवहूतिः कर्दमाय प्रदत्ता तथा प्रसूतिः दक्षप्रजापतये समर्पिता। आसां तिसृणां सन्तभिः समस्तं जगद् व्याप्तं वर्तते।

द्वितीयो मनुर्वभूव अग्निपुत्रः स्वारोचिषः। तृतीयस्य मनोर्नामास्ति उत्तमो यो राज्ञः प्रियव्रतस्यासीत् पुत्रः। चतुर्थस्य मनोर्नामास्ति तामसो यो तृतीयस्य ममोरुत्तमस्यासीद् भ्राता। पञ्चमस्य मनोर्नामास्ति रैवतो यश्चतुर्थस्य मनोः तामस्यासीद्भ्राता। षष्ठा मनुश्चाक्षुषोऽस्ति यश्चक्षुष आसीत् पुत्रः। विवस्वतः (सूर्यस्य) यशस्वी पुत्रः श्राद्धदेव एव सप्तमो वैवस्वतो मनुरस्ति। अष्टमे मन्वन्तरे सूर्याच्छायायानुत्पन्नः सार्वणिर्मनुर्भविष्यति। वरुणस्य पुत्रो दक्षसार्वणि नवमो मनुर्भविष्यति। दशमो मनुर्भविष्यति उपश्लोकपुत्रो ब्रह्मसार्वणिः। एकादशो मनुर्भविष्यति अत्यन्तसञ्जमी धर्मसार्वणिः द्वादशो मनुर्भविष्यति रुद्रसार्वणिः त्रयोदशो मनुर्भविष्यति परमो जितेन्द्रियो देवसार्वणिः। चतुर्दशो मनुर्भविष्यति इन्द्रसार्वणिः। एषां चतुर्दशानां मनूनां मन्वन्तराणि त्रिषुभूत-भविष्य-वर्तमानेषु कालेषु चलितानि, प्रचलन्ति, चलिष्यन्ति च, तद्वारैव सहस्रचतुर्युगीयस्य कल्पस्य गणना क्रियते।

पुराणेषु चतुर्दशापि मनवः परमप्रभावशालिनो जीवानामधीश्वररुयेणाङ्किताः सन्ति। एभिरियं सप्तद्वीपवती वसुन्धरा सहस्रयुगपर्यन्तं पालिता भवति। इमे मनवः स्व स्वमन्तराधिकारे एकैकशो वर्तमानाः कार्यं सञ्चालयन्ति। यदा एते स्व-स्वाधिकारात् निवृत्ता भवन्ति तदा महर्लोके गच्छति।

अस्मिन् कल्पे षण्णां मनूनां कार्यकालः समाप्ति गतोऽस्ति। अयं सप्तमस्य वैवस्वतमनोः प्रचलति समयः। एतदनन्तरं भविस्यकालीनानां सप्तानां मनूनां कार्यकालो भविष्यति, येषु पञ्च सावर्णाः षष्ठो रौच्यः सप्तमश्च भौत्यो मनु र्भविष्यन्ति।

स्वायम्भुवो मनुः पूर्वं ततः स्वारोचिषो मनु।
उत्तमस्तामसश्चैव रैवतश्चाक्षुषस्तथा ॥
षडेते मनवोऽतीता वक्ष्याम्यष्टावनागतान्।
सावर्णा पञ्च रौच्यश्च भौत्यो वैवस्वतस्तथा ॥ = वा. पु. ६३।३.४

वायुपुराणे सावर्णमनूनामुत्पत्तिवर्णनं महद्रोचकमङ्कितमस्ति, तद्यथा दक्षप्रजापतेरेका सुव्रतानाम्नी कन्याऽसीत्। दक्ष एकदा तां सह नीत्वा ब्रह्मणोऽन्तिकमुपस्थितः, यत्र भवो धर्मो वा पूर्वत एव विराजमानावास्ताम्। ब्रह्मा तां कन्यामालोक्य दक्षमुवाच-वत्स! एषा तव कल्याणी कन्या तान् चतुरःपुत्रानुत्पादयिष्यति तद ऽग्रे मनुनाम्ना प्रसिद्धा भविष्यन्ति। तदनन्तरं दक्ष-भव-धर्म ब्रह्मणां मानसिकसङ्कल्पानुसारं तया कन्यया तत्क्षणेएव तेषां चतुर्णांमनु रूपा अतिसुन्दराश्चत्वारः कुमारः समुत्पादिताः। तान् तेजस्विनः प्रभावशालिनश्चकुमारानवलोक्य इमे चत्वारो देवाः, इमे मदीयाः पुत्राः सन्ति, इमे मदीयाः पुत्राः सन्तीत्युक्त्वा तानाक्रष्टुमारब्धवन्तः। अन्ते ते चत्वारः कुमाराः तेषां देवानां मानसिकेनाभिध्यानेनोत्पन्ना आसन् अतस्तैः परस्परं निश्चितं यत् पुत्रो मातापित्रोः स्वभावमनुकरोति। अतो यो यस्य समानः स्यात् स तंगृह्णीयात्। तदनुसारं तेब्रह्मादयोदेवाः स्व स्व स्वभाव-वर्णाकृति-पराक्रमशालिनस्तान् कुमारानगृह्णन्। ते च चत्वारोऽपि कुमारा ब्रह्म-धर्म-दक्ष-भवसमानवर्णाकृतय आसन्। अतस्तेषां चतुर्णां नाम सावर्ण इति जातम्। मननात् मननकरणात्तेषामुत्पत्तिरजायत, अतस्ते चत्वारोऽपि कुमारा मनुनाम्ना विख्याता अभूवन्—

एवं ते समयं कृत्वा सवर्णान् जगृहुः सुतान्।
यस्मात् सवर्णास्तेषां वै ब्रह्मादीनां कुमारकाः।
सवर्णा मनवस्तस्मात् सवर्णत्वं हि ते यतः।
माननान्माननाच्चैव तस्मात्ते मनवः स्मृताः। = वा.पु. १००।५२.५३

एवमिमे चत्वारो मनवो ये सावर्णमनुनाम्ना विख्यातास्ते ब्रह्मादीनां चतुर्णां देवानां मानसिकाः पुत्राः सन्ति। एतदतिरिक्तः विवस्वतः (सूर्यस्य) पुत्रोऽपि सावर्णो मनुः प्रोच्यते, यः सावर्णातः (संज्ञारूपधारिणी-छायातः) समुत्पन्नो जात आसीत् । एवं विवस्वतः (सूर्यस्य) मनुनामानौ द्वौ पुत्रावभूताम्—एको वैवस्वतमनुर्द्वितीयश्च सावर्णमनुः । एनयो ज्येष्ठो वैवस्वतमनुः विश्वकर्मणः कन्यायाः संज्ञात उत्पन्नः, द्वितीयश्च सावर्ण-मनुः सवर्णातः (संज्ञारूपधरिणी-छायातः) उदपद्यत—

वैवस्वतोऽन्तरे राजन् ! द्वौ मनू तु विवस्वतः ।
वैवस्वतो मनुर्यश्च सावर्णो यश्च विश्रुतः ।।
ज्येष्ठः संज्ञासुतो विद्वान् मनुर्वैवस्वतो मनुः ।
सवर्णायाः सुतश्चान्यः स्मृतः सावर्णिको मनुः । = वा. पु. १००।५५.५६

स्वारोचिश-औतम-तामस-रैवताख्या इमे चत्वारो मनवो राज्ञः प्रिय-व्रतस्य वंशे उत्पन्ना आसन्—

स्वारोचिषश्चोत्तमश्च तामसो रैवतो मनुः
प्रियव्रतान्वया ह्येते चत्वारो मनवः स्मृताः ।। = वि. पु. ३।१।२४

चाक्षुषस्य मन्वन्तरस्यान्ते वैवस्वतमन्वन्तरारम्भे प्रजापते रूचेरेकः पुत्रोऽभवद्, यो रौच्यमनुनाम्मा प्रसिद्धः। भूतिनामक जनन्यां यः पुत्रः समुत्पन्नः स भौत्यमनुनाम्नां विख्यातः ।

एवं प्रथमः स्वायम्भुवमनुः ब्रह्मणो मानसपुत्रोऽस्ति । स्वारोचिष-औतम-तामस-रैवत इमे चत्वारो मनवः प्रियव्रतवंशजाः सन्ति । चाक्षुषो मनुः चक्षुषः पुत्रोऽस्ति । दक्षसावर्णिः भवसावर्णिः धर्मसावर्णिः तथा रुद्रसावर्णि इमे चत्वारो क्रमशः दक्ष-ब्रह्म-धर्म-रुद्राणां मानसिकपुत्राः सन्ति । वैवस्वतमनुः सावर्णिमनुश्चेतीमौ द्वौ विवस्वतः (सूर्यस्य)

पुत्रौ स्तः। रौच्यो मनुः प्रजापते रूचेः पुत्रः, भौत्यो मनुश्च भूतेः पुत्रोऽस्ति । १×४×१×४×२×१×१=१४ । एते चतुर्दश मनव एकस्मिन् कल्पे (ब्रह्मण एकस्मिम् दिने) क्रमशः क्रमन्ते ।

प्रतिमन्वन्तरं षडधिकारिणः स्वं स्वं विशिष्ठं कार्यं कुर्वन्ति तथा स्वं स्वं कार्यं सम्पाद्य मन्वन्तरस्य परिवर्तने ते स्वाधिकारं परित्यज्य निवृता भवन्ति, तेसां स्थानेषु नवीने मन्वन्तरे नवीना अधिकारिणो नियुज्यन्ते । सप्तर्षयः प्रतिमन्वन्तरं वेदप्रवर्तका भवन्ति। मनुः मनुष्याणां धर्ममर्यादां स्थिरयितुं व्यवस्थापयति, देवा यज्ञफलभोगकार्यं सम्पादयन्ति, इन्द्रो हि विश्वस्याभ्युदयनिमित्तं वृष्ठि करोति । मनुपुत्राः पृथ्वीपालनं प्रजासंरक्षणं च कुर्वन्ति। अंशावतरस्य विशेष कार्यं धर्मसंरक्षणमधर्मोन्मूलनं सज्जनक्लेशनिवारणं दुर्जनदमनञ्च विद्यते । एवमेषामधिकरिणां कार्यं महन्महत्त्पूर्णं विश्वकल्याणकारकं चास्ति । मनु-मनुपुत्र-देवता-इन्द्र-ऋषिगणा एते पञ्चाधिकरिणो भक्तवत्सलस्य भगवतो विष्णोः सन्ति सात्त्विकांशाः। इमे मनुना सहोत्पद्य संसारसंरक्षणे सहायका भवन्ति—

मनवो भूभुजः सेन्द्रा देवाः सप्तर्षयस्तथा ।
सात्त्विकोंऽशः स्थितिकरो जगतो द्विजसत्तम ।। = वि. पु. ३।२।१४

प्रतिमन्वन्तरं भगवतो विष्णोरंशावतारस्य निर्देशोऽस्ति, येन धार्मिको अव्यवस्था दूरीभवति, विश्वस्य कल्याणं जायते प्राणिमात्रस्य च मङ्गलं वोभुवीति ।

यथा राष्ट्ररक्षानिमित्तं बहवो राजकीयविभागा भवन्ति, तथैव एकस्य ब्रह्माण्डस्य संचालने त्रयो मुख्यविभागा विद्यन्ते । एक आध्यात्मिकविभागो द्वितीय आधिदैविकविभागस्तृतीयश्चाधिभौतिकः विभागा । तत्र प्रथमस्य ज्ञानसम्पन्नविभागस्य सञ्चालका व्यास-वाल्मीकि-वाशिष्ठादयो द्वितीयस्याधिदैविकविभागस्य सञ्चालका

वसुरुद्रादिदेवगणाः तृतीयस्याभौतिकविभागस्य सञ्चालका अर्यमाग्नि-ष्वातादिपितृगणाः सन्ति ।

मनुः सप्तर्षयः देवाः पितरश्चेति चत्वारः प्रतिमन्वन्तरस्य मूलानि अभिमतानि सन्ति । एतदतिरिक्ता याः प्रजाः सन्ति ता एषामन्त-र्भूता भवन्ति । देवा ऋषीणां पुत्राः सन्ति, पितरो देवानां पुत्राः सन्ति, ऋषयश्च देवपुत्राः सन्ति । एवं सप्तर्षिभ्यो ब्राह्मणानां मनोः क्षत्रिय-वैश्य-शूद्रादीनामुत्पत्तिरस्तीतीदतेव मन्वन्तरस्यास्ति संक्षिप्त विवरम् ।

सप्तर्षयो मनुर्देवा पितरश्च चतुष्टयम् ।
मूल मन्वन्तरस्यैते तेषाञ्चैवान्तरे प्रजाः ।
ऋषीणां देवताः पुत्राः पितरो देवसूनवः ।
ऋषयो देवपुत्राश्च इति शास्त्रविनिर्णयः ॥ = वा. पु. ६२।१९.२०

खगोलचर्चा

प्रायः सर्वेषु पुराणेषु खगोलसम्बन्धिविवेचनं विद्यते, परं विशेषततया विष्णु-ब्रह्माण्ड-कूर्मपुराण-भविष्यपुराण-श्रीमद्भागवतेषु तु खगोलस्य पर्याप्तं विवेचनं कृतमस्ति । एषु सूर्य-चन्द्रादि-ग्रहोपग्रह-नक्षत्र–मण्डल–राशिचक्र– शिशुमारचक्र–ध्रुवतारादीनामुत्पत्ति–गति–विगवि-परिवर्तनादि-रहस्यं विवेकपूर्णपद्धत्या लिखितमस्ति । केषां ग्रहोपग्रहताराणां किं परिमाणमस्ति ? को ग्रहः पथिवीतः कियद्दूरं वर्तते ? कश्च ग्रहः कया गत्या कियति काले केन मार्गेण भ्रमति ? कस्य ग्रहस्य कदा को वा कुत्र च प्रभावो भवति ? एभ्यो ग्रहोपग्रहा-दिभ्यः को लाभो भवति मानवानामिति तर्कसंगतं विवेचनं पुराणा-नामस्ति मौलिको विषयः ।

विश्वस्य वैज्ञानिकाः खगोलविषयकगवेषणायां यथायथमग्रेसरन्ति तथा तथा पौराणिकं खगोलं समीचीनं प्रतीयते । अमेरिका-रूसयो

-रुपग्रहै-विश्वस्य वैज्ञानिकानां नेत्राणि उद्घाटितानि। समस्तः संसारः साम्प्रतं मन्तुमुद्यतो जातोऽस्ति, यत् पुराणवर्णितं खगोलं सत्यमस्ति। रूसस्य राकेटो मङ्गललोकमाक्रामति। अमेरिकायाः स्फुटनिकश्चन्द्र-धरातले भूयो भूयो गच्छति प्रत्यागच्छति च।

सोम-सूर्ययोः पौराणिकी समीक्षा

अखिललोकस्त्रष्टु भंगवन्नारायणनाभिह्लदसमुद्भवसरोजजन्मनो हि ब्रह्मणो मानसपुत्रो महर्षिरत्रिमुनिरजायत। स च लोककल्याण-कामनया पित्रा विधात्रा सृष्ट्यर्थं समादिष्टो मनोवाक्कायकर्मभिः शुभानि समाचरन् काष्ठ - कुड्य - शिलासन्निभ ऊर्ध्ववाहुः सन् दिव्य-त्रिशत्सहस्रवर्षपर्यन्तमनुत्तमं नाम दुश्चरं तपस्तेपे। तेनानन्दमयं क्लेशनिवारकं ब्रह्मविष्णुमहेशानामान्तरिकं तेजः प्रकाशितम्। तेषा-मष्टमांशेन च सोमस्योत्पत्तिरजायत। तपःप्रभावात् सञ्जातनिर्मल-कान्तेर्निर्निमेषं तपतस्तस्य अत्रिमुने र्नेत्राभ्यां तेजोविन्दुः सहसा प्रास्रवत्, यज्ज्योत्स्नया स्थावरजङ्गमात्मके समस्ते विश्वे प्रकाशो जातः[1]।

लोकपितामहस्य विधेरादेशात्तं तेजोविन्दुं पुत्रेच्छया स्त्रीरूपेण दिशो धारयामासुः, किन्तु तत्तेजसो दुर्धर्षतया ताश्चिरं धर्तुमसमर्थाः सत्यो भूमौ प्राक्षिपन्। ततो वेधा वसुधायां पतन्तं तमादाय पुरुषाकारं च विधाय स्ववेदमये रथे संस्थाप्य तेन सागरपर्यन्ताया वसुन्धराया एकविंशतिवारं प्रदक्षिणं कारयित्वा तं स्वं धाम नीतवान्।

---

१. आदिष्टो ब्रह्मणा पूर्वमत्रिः सर्गविधौ पुरा।
अनुत्तमं नाम तपः सृष्ट्यर्थं तप्तवान् प्रभुः॥
अधः सुस्राव नेत्राभ्यां धाम तच्चाम्बुसम्भवम्।
दीपयद्विश्वमखिलं ज्योत्स्नया सचराचरम्॥=म. पु. २३।२.६

तत्र देवर्षिभिः सोमदैवत्यै र्मन्त्रैः संस्तूयमानं तं भगवानब्जयोनिरशेषौषधि-द्विज-नक्षत्राणामाधिपत्येऽभ्यषेचयत्[१]।

मत्स्यपुराणानुसारं तु राज्ञः पृथोः पृथिव्या आधिपत्येऽभिषेकानन्तरं तेनैवौषधि-यज्ञ-व्रत-तपसामाधिपतिश्चन्द्रःकृतः[२]।

चन्द्रमसो यत्तेजः पृथिव्यामपतत्तदौषधिरूपेण परिणतम्। अतोऽद्यत्वेऽपि तत्तेजसा रात्रौ जाज्वल्यमाना भवन्त्योषधयः। एवं चन्द्रमा ओषधीशो द्विजराजश्च कथ्यते[३]। अत एव कोषकाराः–'ओषधीशो निशापतिः' द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः, इत्यादि चन्द्रपर्यायमाहुः। एवं प्राप्ताधिपत्यः स भुवनत्रयं पालयन् विष्णुध्यानैकतत्परो दश पद्मवर्षपर्यन्तं तीव्रं तपः समाचरन् भगवन्तं विष्णु प्रसाद्य तेन वरं वृणुष्वेत्युक्तः शक्रलोकजिगोषया करिष्यमाणे स्वराजसूये यज्ञे प्रत्यक्षीभूय फलभोक्तृत्वस्य च वर ययाचे[४]। ततो भगवता विष्णुना तथास्त्वित्युक्त्वाऽन्तर्हिते तस्मिन्नयं तपसो विरम्य महतोत्साहेन ससम्भारं राजसूयं नाम महायज्ञ समाजह्रे, यत्र महर्षिरत्रिर्होता, भृगुरध्वर्युः, हिरण्यगर्भ उद्गाता, स्वयं ब्रह्मैवब्रह्मा, उपद्रष्टा साक्षा-

१. द्विजातीनां वीरुधां च नक्षत्राणां ग्रहैः सह।
यज्ञानां तपसां चैव सोमं राज्येऽभ्यषेचयत्॥=वा. पु. ७०।३

२. यदाभिषिक्तः सकलाधिपत्ये पृथुर्धरित्र्यामधिपो बभूव।
तदौषधीनामधिपं चकार यज्ञव्रतानां तपसां च चन्द्रम्॥=म. पु. ८।२

३. तद्दीप्तिरधिका तस्माद्रात्रौ भवति सर्वदा।
तेनौषधीशः सोमोऽभूद् द्विजेशश्च निगद्यते॥=म. पु. २३।१३

४. ततो वव्रे वरान् सोमः शक्रलोकं जयाम्यहम्।
प्रत्यक्षमेव भोक्तारो भवन्तु मम मन्दिरे॥
राजसूये सुरगणा ब्रह्माद्याः सन्तु मे द्विजाः॥=म. पु. २३।१८

द्धरिः सदस्याश्च सनकादयो मुनयोऽभुवन्[१]।

ईदृशस्यापूर्वस्य राजसूयसत्रस्य सम्पादनप्रभावादत्युत्कृष्टाधिपत्याधिष्ठातृत्वाच्चैन मद आविवेश। मदावलेपाच्चासौ भ्रान्तचित्तो दुर्बुद्ध्याऽवितयावनतः सन् देवगुरोः पत्नीं तारानाम्नीं बलाज्जहार। बृहस्पतिना तदनुरोधेन देवै भूयो याच्यमानो देवर्षिभिश्च प्रेर्यमाणोऽपि स तत्सुखपाशबद्धो न तां प्रत्यावर्तयत्[२]। तन्त्र-मन्त्र-यन्त्राद्यभिज्ञोऽपि वाक्पतिर्न तस्मै शाप प्रदातुं प्राभवत्, न सा कैरप्युपायैः तस्यापकार कर्तुं समर्थो जातः[३]। देवगुरु बृहस्पतिं प्रति द्वेपकारणाद् देवविद्वेषिणामसुराणामाचार्यः शुक्राचार्यश्चन्द्रमसः पार्ष्णिग्राहोऽजायत। उशनसः सहयोगाच्च दैत्यदानवनिकाया अपि तत्पक्षे महान्तमुद्योगं चक्रुः। बृहस्पतिपक्षे तु सकलदेवसेनासहायः शक्रोऽपि सहायकोऽभवत्। बृहस्पतेः पितुरङ्गिरसः सकाशोपलब्धविद्यः तत्स्नेहपाशबद्धो रुद्रोऽपि तत्साहाय्यकामनया प्रमथगणैः सार्कं स्वकीयमाजगवं धनुरादाय सोमेन

---

१. होतात्रिर्भृगुरध्वर्युरुद्गाताऽभूच्चतुर्मुखः।
ब्रह्मत्वमगमत्तस्य उपद्रष्टा हरिः स्वयम्।
सदस्याःसनकाद्यास्तु राजसूयविधौ स्मृता ॥=तत्रैव. २३।२१

२. तदा यत् प्राप्य दुष्प्रापमैश्वर्यमृषिसंस्तुतम्।
स विभ्रममति विप्रा विनयोऽविनयाहतः॥
बृहस्पतेः स वै भार्यां तारां नाम यशस्विनीम्।
जहार सहसा सर्वानवमत्याङ्गिरः सुतान्॥
स याच्यमानो देवैश्च तथा ब्रह्मर्षिभिश्च ह।
नैव व्यसर्जयत्तारां तस्मायाङ्गिरसे तदा ॥=वा. पु. ९०।२७.१९॥

३. शशाक शापं न च दातुमस्मै न तन्त्रशास्त्राग्निविषैरशोपैः।
तस्यापकर्तुं विविधैरुपायैर्नैवाभिचारैरपि वागधीशः॥ म. पु. २३।३३

सह योद्धुमुपस्थितः[१] । श्रीमद्भागवतमप्येतत् सर्वं समर्थयति ।

ततो रुद्रपुरोगा इन्द्रादिदेवा असुरेषु, असुराश्चोशनसा समन्विता देवेषु सरोषं शास्त्रास्त्राणि मुमुचुः । एवमुग्रतीक्ष्णैरायुधैः परस्परं युध्यतोः वाणांश्च प्रक्षिपतो र्द्वयो र्दलयोरतीवोग्रो भयङ्करस्तारा-निर्मित्तः तारकामयः सङ्ग्रामः समारब्धः ।

येन भूम्यन्तरीक्षयो र्महतो भीतिरुत्पन्ना । ईदृशेन सकलक्षोमकरेण महाहवेन क्षुब्धहृदयमशेषं जगद् ब्रह्माणं शरणनुपेत्य तन्निवारणाय प्रार्थनाश्चकार । ततो लोकपितामहेन ब्रह्मणा विश्वविनाशाय प्रवृत्ते तस्मिन् तारकामये सङ्ग्राने सहसा कथञ्चित् प्रविश्य भगवन्तं पिनाकपाणिमुग्रमुशनसं देव-दैत्य-दानवगणांश्च निवारयन् सोममुवाच-सोम ! परस्त्रीहरणादकार्यात्त्वं सौम्योऽपि ग्रहेषु षापीयान् गणयिष्यसे, वृहस्पतेर्भार्यां तारां प्रत्यावर्तय, परस्वप्रत्यर्पणेऽपसानं न सम्भवति[२] । ततः ओमित्युक्त्वा युद्धाद्विरतेंऽशुमाली स्वयमेव विधाता गुरवे तां तारां प्रत्यावर्तयत[३] । ततः

---

१. ततः सशिष्यो गिरिशः पिनाकी वृहस्पतिस्नेहवशानुवद्धः ॥
धनुर्गृहीत्वाजगवं पुरारि र्जगाम भूतेश्वरसिद्धजुष्टः ।
युद्धाय सोमेन विशेषदृप्तः तृतीयनेत्रानलभीमवक्त्रः ॥ तत्रैव. २३।३७½

२. तदस्त्रयुग्मं जगतः क्षयाय प्रवृद्धमालोक्य पितामहोऽपि ।
अन्तःप्रविश्याथ कथ कथञ्चिन्निवारयामास सुरैः सहैव ॥
यस्मात् परस्त्रीहरणाय सोम ! त्वया कृतं युद्धमतीव भीमम् ।
पापग्रहस्त्वं भविता जनेषु शान्तोऽप्यलं नूनमथासितान्ते ॥
भार्यामिमामर्पय वाक्पतेस्त्वं नचावमानोऽस्ति परस्वहारे।म.प.२३।४४।४६

३. ततो निवार्योशनसं रुद्रं ज्येष्ठं च शङ्करम् ।
ददावाङ्गिरसे तारां स्वयमेव पितामहः ॥ वा. पु. ९०।३५

तामन्तः प्रसवामालोक्य देवगुरुः-देवि ! नैव मम क्षेत्रे भवत्यन्यसुतो ग्राह्यः तस्मादेनमुत्सृजेति तामुवाच। सा चैवमुक्ता पत्युश्चच्छन्दानुसारिणी सोमेन वलादाहितं तं गर्भं तृणगुच्छे उत्ससर्ज। स चोत्पन्नमात्र एवातितेजसा समेषां देवानां तेजांसि अभिभूतवान्। ततः कनकप्रभस्य कुमारस्यातितेजस्वितया चारुतया च गुरुमिन्दुञ्च साभिलाषौ दृष्ट्वा समुत्पन्नसन्देहाः सन्तो देवाः—माता भस्त्रा पितुः पुत्रः, इत्यादिवचनात् पितुरेव पुत्रः, मातैव पुत्रजनकं वेत्ति, इत्यतोऽस्य को जनक इति निश्चेतुं तारामेव पप्रच्छुः-कथय सुभगे ! कस्यायमात्मजः कुमारः सोमस्य, गुरोर्वा ? इत्येवं वहुशः पृष्टाऽपि सा यदा ह्रिया न किञ्चिदुक्तवती[१] तदा कुमारः क्रोधाविष्टः प्राह-दुष्टे अम्ब ! कस्मान्न मम तातमाख्यासि, साम्प्रतमेवाहमलीकलज्जावत्यास्ते शास्तिं करोमि[२]।

अथ प्रपितामहो ब्रह्मा तं कुमारमपवार्य स्वयमेवाप्राक्षीत्-वत्से ! सत्यं ब्रूहि, कस्यायमौरसः कुमारः, सोमस्याथ वृहस्पतेर्वा ! ततः सा लज्जा जडं शनैः प्राह-सोमस्येति। ततः स्फुरदुच्छ्वसितामलकपोलकान्तिरुडुपतिः कुसुमशरसुन्दरं तं सुकुमारं कुमारं प्रेमनिर्भरमालिङ्ग्य-साधु वत्स ! साधु ! प्रज्ञासम्पन्नोऽसीत्युच्चार्य बुध इति तस्य नाम चक्रे[३]। ततोविधाता तस्याभिषेकं विधाय युवानं कृत्वा तस्मै ग्रहसाम्यं

---

३. अपृच्छंस्ते सुरास्तत्र केन जातः कुमारकः।
अथ सा लज्जिता तेषां न किंचिदवदत्तदा ॥ म. पु. २४।५

१. ह्रीयमाणा यदा देवान्नाह सा साध्वसाधु वा।
तदा तां शप्तुमारब्धः कुमारो दस्युहन्तमः ॥ वा. पु. ९०।४०

२. सा प्राञ्जलिरुवाचेदं ब्रह्माणं वरदं प्रभुम्।
सोमस्येति महात्मानं कुमारं दस्युहन्तमम् ॥
ततः सुतमुपाघ्राय सोमो दाता प्रजापतिः।
बुध इत्यकरोन्नाम तस्य पुत्रस्य धीमतः ॥ वा. पु. ९०।४२.४३

प्रदाय पश्यत्सु च देवेषु ब्रह्मर्षिभिः सह स्वकं धामं जगाम ।[१]

ततः प्राप्तापूर्वाधिपत्याधिष्ठातृत्वमाह्लादजनक सर्वानन्दकरं सोम समवेक्ष्य दक्षप्रजापतिना रूपलावण्यसम्पन्नाः सुयोग्याः स्वकीयाः सप्तविंशतिकन्यकाश्चन्द्रमसे पत्नीत्वेन समर्पिताः। एताः सर्वा दक्षात्मजाश्चन्द्रपत्न्यः कालविभागज्ञापने नियक्ता लोकव्यवहारनिर्वाहाय नक्षत्रनाम्ना ज्यौतिषशास्त्रेषु व्यवहृता विद्यन्ते[२] ।

यद्यपि चन्द्रमसः सर्वा अपि भार्याः समानरूपवत्यः सर्वाङ्गसुन्दर्यश्चासन् तथापि तासु रोहिणी सर्वातिशायिनो चन्द्रमसो मनोरमा वभूव[३] । अतोऽन्या उपेक्ष्य स रोहिण्यामेव प्रीतिमानभूत् । तदिदमनुचितं मत्वा ताः सर्वा ईर्ष्यावत्यः पितुः समीपमुपेत्यामुमर्थं शशंसुः-तात ! अस्मासु तुल्यप्रभावसु सतीष्वपि ते जामाता रोहिणीमेवाधिकं भजतीति । ततो दक्षः चन्द्रमसमाहूय सर्वासु समानभावेन व्यवहाराय सोममादिश्य ताः प्रत्यावर्तयत । अथापि तदादेशमवहेल्य स पूर्ववद् रोहिण्यामेवासक्तो वभूव ।

पुनस्तच्छ्रुत्वा दक्षेण रोषात्तदर्थं राजयक्ष्माणमुत्पाद्य तच्छरीरे प्रवेशितः । ततः शनैः शनैः क्षीयमाणे चन्द्रे यदा ओषधयः प्रजाश्च

---

१. अभिषेकं ततः कृत्वा युवानमकरोद्विभुः ।
ग्रहसाम्यं प्रदायाथ ब्रह्मा ब्रह्मर्षि संयुतः ॥
पश्यतां सर्वदेवानां तत्रैवान्तरधीयत ॥ म. पु. २४।८-९

२. ताः सर्वास्त्वनवद्याङ्गाः कन्याः कमललोचनाः ।
कालस्य नयने युक्ताः सप्तविंशतिमिन्दवे ॥ म. भा. आ. प. ७५।९
सप्तविंशत्तु याः कन्या दक्ष सोमाय ता ददौ ।
सर्वा नक्षत्रनाम्न्यस्ता ज्योतिषे चैव कीर्तिताः ॥ वा. पु. ६६।५२

३. तास्तु सर्वा विशालाक्ष्यो रूपेणाप्रतिभा भुवि ।
अत्यरिच्यत तासां तु रोहिणी रूपसम्पदा ॥ म. भा. शा. प. ३५।४६

क्षीणतांमुपगताः तदा देवानामनुरोधेन दक्षः तद्रोगनिवृत्तये उपायं निर्दिशन्नुवाच सोमो हि सर्वासु भार्यासु समानं व्यवहरतु, अपि च पश्चिमे समुद्रे सरस्वत्यब्धिसङ्गमे हिरण्मयतीर्थे स्नानं च कुर्यात् । तत्रैव भगवतो महादेवस्याराधनया तस्य कान्तिः प्रागिव निर्मला भविष्यति[१] । अथ पञ्चदशदिनपर्यन्तं क्षीणो भविष्यति तथा पञ्चदश दिनानि यावद् वर्द्धिष्यते । तदनुसार सोऽमावस्यायां तत्र तीर्थे स्नात्वा तत्तीर्थप्रभावात् पूर्ववत् स्वकीयानि प्रकाशवन्ति प्रभायुक्तानि शीललानि किरणान्यवाप्य पुनः समस्तं जगत् प्रकाशयितुमारब्धवान् । अतस्तत्कालादेव तत्तीर्थं प्रभाप्राप्त्या प्रभासतीर्थनाम्ना प्रसिद्धं जातम्[२] । तेनैव शापेनाद्यापि चन्द्रमाः कृष्णपक्षे प्रतिपदमारभ्यामांयावत क्रमशः प्रत्यहं क्षीयते तथा शुक्लपक्षे प्रतिपदमारभ्य पूर्णिमापर्यन्तमेकैकाभिः कलाभिः वर्द्धते । पीयूषपिण्डमय तस्य मण्डलाकारं स्वरूपं मेघस्य श्यामया रेखयाऽऽच्छन्नमिव दृश्यते तथा तस्य शरीरमध्ये मेघश्यामलं शशकचिह्नं स्पष्टं विलोक्यते । इति महाभारतीया कथाऽत्रानुसन्धेया (शान्तिपर्वणि ३४२।५७-५८) । अत एव च चन्द्रार्घ्यप्रदानसमये सोमस्यात्रिनेत्र-समुद्रसम्भवत्वं सम्मक् सघटते—

अत्रिनेत्रसमुद्भूत ! क्षीरोदार्णवसम्भव !
गृहाणार्घ्यं मया दत्तं रोहिण्या सहितः शशि !

वायुपुराणानुसारं तु राजयक्ष्मणा प्रतिदिनं क्षीयमाणः सोमः स्वं पितरमत्रिमुनिमुपेत्य तन्निवृत्तये प्रार्थनाञ्चकार । तदनु तेन स्वकीयेनतपोवलप्रभावेण तस्य शमनं विधाय स स्वस्थीकृतः ।

---

१. समं वर्ततु सर्वासु शशी भार्यासु नित्यशः ।
समुद्रं पश्चिमं गत्वा सरस्वत्यब्धिसङ्गमम् ।
आराधयतु देवेशं ततः कान्तिमवाप्यति ।। म. भा. शा. प. ३५।७७

२. विमुक्तशापः पुनराप्य तेजः सर्वं जगद् भासयते नरेन्द्र !
एवं तु तीर्थप्रवरं पृथिव्यां प्रभासनात् तस्य ततः प्रभासः ।। तत्रैव ३५।४२

अपि च शीतलरश्मिः सूर्य इव तेजस्वी प्रकाशमयः प्रसन्नात्मा चन्द्रमाः समुद्रमन्थनसमये मथ्यमानात् क्षीरसमुद्रान्निगतेषु चतुर्दश-रत्नेष्वन्यतमं रत्नमप्युक्तमस्ति महाभारते पुराणेषु च[1]। पूर्णिमायां चन्द्रोदयसमये ताम्रपात्रे मधुमिश्रितपक्वान्नैर्युक्तस्य वलेश्चन्द्रमसे समर्पणेन चन्द्रसमुद्रयो वृद्धिर्जायते, साध्य-रुद्रादित्य-विश्वेदेव मरुद्-गणाश्विनीकुमारादीनां च महती तृप्तिर्भवति।

किञ्च धर्मपुत्रेष अष्टसुवसुषु अन्यतमोऽपि सोमः प्रोक्तो विद्यते। वसुरूपेणायं मानस्विन्या गर्भजोऽस्ति। अस्य मनोहरनामिकायां पत्न्यां चत्वारस्तनया अजायन्त-वर्चाः, शिशिरः, प्राणः, रमणश्च। तत्र सोमः स्व ज्येष्ठ पुत्रं वर्चस देवकार्यसिद्धिनिमित्त षोडशवर्षपर्यन्तं भूतले स्थातुं पणीकृत्य प्रेषितवानासीत्, योऽभिमन्युरूपेणार्जुनात् सुभद्रायामुत्पन्न आसीत्[2]।

पीयूषपिण्डस्य सोमस्यामृतमय्यः षोडशकलाः सन्ति। तत्र कृष्ण-पक्षे प्रतिपदमारभ्यामावस्यापर्यन्त प्रत्यह पितृदेवाः क्रमश एकैकां कलां पिवन्ति। दर्शपर्यन्तं पञ्चदशसु कलासु पितृभिः पीतासु षोडश्याः कलाया अवशिष्टत्वादेककलं चन्द्रमसं भगवान् भास्करः स्वकीयेन सुषुम्णाख्येन रश्मिना पुनः पूर्णिमापर्यन्तमेकैकामेव कलामाप्याययति। एवं सुधास्रा-विकिरणस्य सोमस्यामावस्यां यावदेकैकां कलांः पितरः पिवन्ति। पितृभिः पीतसुधं कलामात्रावशिष्टं सोमं सूर्यदेवः स्वै प्रकाशमयै किरणैः पुनः पोषयति। येन क्रमेण पितरश्चन्द्रमसोऽमृतं पिवन्ति तेनैव

---

१. ततः शतसहस्रांशु मंथ्यमानात् सागरात्।
प्रसन्नात्मा समुत्पन्नः सोमः शितांशुरुज्वल; ।। म० भा० आ. प. १८।३४

२. यस्तु वर्चा इति ख्यातः सोमपुत्रः प्रतापवान्।
सोऽभिमन्युर्वृहत्कीर्त्तिरर्जुनस्य सुतोऽभवत् ।।
ततः षोडशवर्षाणि स्थास्यत्यमरसत्तमाः ।। म. भा. आ. प. १६७।१२२

क्रमेणादित्यः शुक्लपक्षीयप्रतिपत्तिथितः पूर्णिमापर्यन्तं प्रतिदिनं निशाकरं पुष्णाति[1]। इत्थं पञ्चदशभिर्दिनैः सञ्चितं सोमामृतं सुधाहाराः पितरः पुनः पातुमारभन्ते, यतस्ते मृत्युभेषजरूपायाः सुधाया नियमेन पानात् कल्पान्तकालपर्यन्तं जीवन्ति। अतस्ते सुधाहारदिना अमरा अप्युच्यते[2]।

तथा च जन्यभावमात्रस्य नियमेन ध्वंसप्रतियोगित्वात् पितृदेवानाममरत्वमनुपपन्नमित्याक्षेपो निरस्तः, प्रलये भावभूतानां तेषां पितृदेवानां विनाशे सति तत्पूर्वकालं यावत् स्थितिरूपस्यामरत्वस्य निर्बाधात्।

यस्मिन् समये द्विकलामात्रावशिष्टश्चन्द्रमाः सूर्यमण्डले प्रविश्य तस्यामानामके किरणे तिष्ठति स कालोऽमावस्या तिथिः कथ्यते।[3] अमावस्यां रात्रौ सोमः क्रमशः प्रथमं जले प्रविशन् वृक्षलतादिषु निवसन् सूर्ये प्रविशति। अतोऽस्मिन् समये यो वृक्षादि छिनत्ति

---

१. क्षीण पीत सुरैः सोममाप्यायति दीप्तिमान्।
मैत्रेयैककलं सन्तं रश्मिनैकेन भास्करः॥
येन क्रमेण पीतोऽसौ देवस्तेन निशाकरम्।
आप्यायत्यनुदिनं भास्करो वारितस्करः॥ वि०पु० २।१२।४-५
पीतं पञ्चदशाहञ्च रश्मिनैकेन भास्करः।
आपूरयन् ददौ तेन भागं भागमहः क्रमात्॥
इत्येव सूर्यवार्येण चन्द्रस्याप्यायते तनुः।
पूर्णिमास्यां प्रदृश्येत शुक्लः सम्पूर्णमण्डलः॥ म०पु० २५।५५-५७

२. सम्भृतञ्चार्द्धमासेन तत् सोमस्थं सुधामृतम्।
पिबन्ति देवा मैत्रेय! सुधाहारा यतोऽमराः॥ वि० पु० २।१२।६

३. कलाद्वयावशिष्टस्तु प्रविष्टः सूर्यमण्डलम्।
अमाख्यरश्मौ वसति अमावस्या ततः स्मृता॥ तत्रैव० २।१२।८

पत्रादिकं वा त्रोटयति तस्य ब्रह्महत्यायाः पातकं भवति[१]।

तदेवं दर्शाहोरात्रेऽप्सु वीरुत्सु च प्रवेशादुपक्षीणप्राये कलात्मके पञ्चदशभागे किञ्चिदवशिष्टे सति अपराह्णे पितृगणाः पानार्थं चन्द्रमसं पर्युपासते। द्विकलं सोमं पर्युपास्य तस्येन्दोः शिष्टां पञ्चदशीं कलामेव द्विलवपरिमितं कालं निभृतं पितरः पिबन्ति, नतु षोडशीं कलामपि। इत्थमामावस्या सोमस्य गभस्तिभ्यो निःसृतं सुधामृतं पीत्वा सौम्या बर्हिषदः अग्निष्वात्ताश्च पितरो मासपर्यन्तं परमां तृप्तिमाप्नुवन्ति[२]। "सोमाच्चैवामृतप्राप्तिः पितृणां तर्पण तथा"। इत्यादि वचनानुसारम् अमावस्यायां कुहुकाले सोमामृतेन तर्पणस्य महन्महत्त्वमस्ति। अत एव बुधस्य पुत्रः पुरूरवाः[३] कुहुमात्रे सोमसुधया पितृन् तर्पयितुं प्रत्यमावस्यं दिवमुपतिष्ठते स्म। एवं चन्द्रमाः शुक्लपक्षे देवगणान् कृष्णपक्षे पितृन् तथाऽमृतमयैः शीतलै रश्मिभिर्वृक्षलतौषधींश्चाह्लादयन् मनुष्य-पशु-पक्षी-कीट-पतङ्गादीन् समस्तान् प्राणिनो निरन्तरं पुष्णाति[४]।

---

१. छिनत्ति वीरुधो यस्तु वीरुत्संस्थे निशाकरे।
पत्रं वा पातयत्येकं ब्रह्महत्यां स विदन्ति ॥ तत्रैव० २।१२।१०

२. निःसृतं तदमावस्यां गभस्तिभ्यः सुधामृतम्।
मासं तृप्तिमवाप्याग्र्यां पितरः सन्ति निर्वृत्ताः ॥
सौम्या बर्हिषदश्चैव अग्निष्वात्ताश्च ते त्रिधा ॥ वि० पु० २।१२।१३

३. ऐलः पुरूरवा विद्वान् मासि श्राद्धचिकिर्षया।
ततः स दिवि सोमं वै ह्युपतस्थे पितृनपि ॥
द्विलवं कुहुमात्रं च वसंस्तेषां च तृप्तये।
स्वधामृतेन सौम्येन तर्पयामास वै पितृन् ॥ म० पु० ४०।७-१२

४. एवं देवान् सिते पक्षे कृष्णपक्षे तथा पितृन्।
वीरुधौषधिनिष्पत्त्या मनुष्य-पशु-कीटकान् ॥
आप्यायति शीतांशुः प्रकाशाह्लादनेन च ॥ वि० पु० २।१२।१४-१५

एवं विष्णुशक्त्यधिष्ठितस्य रवेरपि पित्रादितर्पकत्वमुक्तमस्ति। शुक्लप्रतिपदमारभ्यापूरितः षोडशकलः सन् कृष्णपक्षीयप्रतिपदादि प्रत्यहमेकैककलांशेनामरैः पीयते। एवममरैरेककलायामंशेन पीतायां चतुर्दश्यन्ते द्विकलमवशिष्टं सन्तं कृष्णपक्षक्षये दर्शे पितरः किञ्चित् पिबन्ति। तेन चन्द्रतर्पणप्रकारेण भास्करात्तेषां देवपितृणां तर्पणं भवति[१]।

भगवान् भास्करो हि समस्तस्य जगत आत्माऽस्ति। स पृथिवी-द्युलोकयोर्मध्ये स्थितः आकाशमण्डलस्याभ्यन्तरे कालचक्रे चङ्क्रम-माणो द्वादशान् मासान् विभजति। रात्रिदिनयोर्व्यवस्थायाः कारणं भगवान् सूर्यः प्रातरुदीय माध्याह्नं यावत् स्वकिरणैस्तपति, ततो क्षीयमाणैरश्मिभिरस्तं याति, सूर्यस्योदयास्तमनाभ्यामेव पूर्वपश्चिम-योर्दिशो ज्ञानं जायते—

अहोरात्रव्यवस्थानकारणं भगवान् रविः।
उदितो वर्द्धमानाभिरामध्याह्नात्तपन् रविः॥
ततः परं ह्रसन्तीभिर्गोभिरस्तं नियच्छति।
उदयास्तमनाभ्याञ्च स्मृते पूर्वापरे दिशौ॥ = वि. पु. २।८।१८-१९

एष एवादित्यः षण्णामृतूनां हेतुः। इत एव दक्षिणायनोत्तरायणयो र्भवति विभागः। युगानां भेदकः कल्पकारकश्चायमेव। अस्यैवाधारेण ब्रह्मणः परार्द्धसंख्या संभवति। अयमेव संसारस्य कर्ता धर्ता भर्ता

---

१. पितृदेवमनुष्यादीन् स सदाऽऽप्याययन् प्रभुः।
परिवर्त्तत्यहोरात्रं कारणं सविता द्विज॥
सूर्यरश्मिः सुषुम्णो यस्तर्पितस्तेन चन्द्रमाः।
कृष्णपक्षेऽमरैःशश्वत् पीयते वै सुधामयः॥
पीतं तद् द्विकलं सोमं कृष्णपक्षक्षये द्विज।
पिबन्ति पितरः शेषं भास्करात्तर्पणं तथा॥ तत्रैव० २।११।२१-२३

चाभिमतोऽस्ति । ब्रह्मनिष्ठा ब्राह्मणाः दैनन्दिनं गायत्रीमन्त्रद्वारा एनमेवोपासते । मर्यादा-पुरुषोत्तमस्य भगवतः श्रीरामस्य कुलस्यादिकारणमयमेवास्ति । अतः समस्तस्यास्य जगतोऽय मान्यः प्रणम्यश्च विद्यते । श्रीमद्भागवते वर्णनं विद्यते यत् पृथिव्या यावन्तो विभागा भवन्ति, ते सर्वे भगवता सूर्येणैव भवन्ति—

सूर्येण हि विभज्यन्ते दिशः खं द्यौर्मही भिदा ।
स्वर्गापवर्गौ नरका रसौकांसि च सर्वशः ॥—५।२०।४५

पृथिवीत उपरिभागे लक्षयोजने दूरे सूर्यमण्डलं वर्तते । सूर्यतो लक्षयोजनमुपरि चन्द्रमण्डलं विद्यते । चन्द्रमसो लक्षयोजन दूरे उपरि प्रकाशते नक्षत्रमण्डलम् । नक्षत्रमण्डलतो द्विलक्षयोजनोपरि वर्तते बुधः । बुधतोऽपि द्विलक्षयोजने उपरि विद्यते बृहस्पतिः । बृहस्पतितो द्विलक्षयोजने उपरि वर्तते शनिः । शनितो लक्षयोजनोपरि वर्तते सप्तर्षिमण्डलम् । सप्तर्षिभ्योऽपि शतयोजनोपरि वर्तते ध्रुवलोकः । ध्रुवलोकतः कोटियोजनोपरि महर्लोकोऽस्ति, यत्र कल्पान्तपर्यन्तं निवसन्ति भृग्वादयः सिद्धवर्याः । ततोपि द्विकोटियोजनोपरि वर्तते जनलोकः, यत्र विराजन्ते निर्मलमानसा ब्रह्मणो मानसपुत्राः सनकादयः । जनलोकतश्चतुर्गुणयोजनोपरि अस्ति तपोलोकः, यत्रवैराजनामकदेवगाणानामस्ति निवासः येषां कदापि दाहो नभवति । तपोलोकात् षड्गुणे दूरे सत्यलोको विराजते यो ब्रह्मलोकोऽप्युच्यते, यत्रापुनर्मृत्यवोऽमरा निवसन्ति । तद्विवरणं यथा—

सूर्यतः	१	लक्षयोजनोपरि	चन्द्रमा वर्तते
चन्द्रमसः	१	,,	नक्षत्रमण्डलमस्ति ।
नक्षत्रमण्डलतः	२	,,	बुधोऽस्ति ।
बुधतः	२	,,	शुक्रोऽस्ति ।
शुक्रतः	२	,,	मङ्गलोऽस्ति ।
मङ्गलतः	२	,,	बृहस्पतिरस्ति ।

वृहस्पतितः	२	,,	शनैश्चरो वर्तते ।
शनैश्चरतः	१	,,	सप्तर्षिमण्डलमस्ति ।
सप्तर्षिमण्डलतः	१	,,	ध्रुवलोको विद्यते ।
ध्रुवलोकतः	१	कोटियोजनोपरि	महर्लोको वर्तते ।
महर्लोकतः	२	,,	जनलोकोऽस्ति ।
जनलोकतः	८	,,	तपोलोको विद्यते ।
तपोलोकतः	१२	,,	सत्यलोकः (ब्रह्मलोकः) ।

भूमेर्योजनलक्षे तु सौर मैत्रेय ! मण्डलम् ।
लक्षाद्दिवाकरस्यापि मण्डलं शशिनः स्थितम् ॥
पूर्णे शतसहस्रे तु योजनानां निशाकरात् ।
नक्षत्रमण्डलं कृत्स्नमुपरिष्टात् प्रकाशते ॥
द्वे लक्षे चोत्तरे ब्रह्मन् ! बुधो नक्षत्रमण्डलात् ।
तावत्प्रमाणभागे तु बुधस्याप्युशनाः स्थितः ॥
अङ्गारकोऽपि शुक्रस्य तत्प्रमाणे व्यवस्थितः ।
लक्षद्वये तु भौमस्य स्थितो देवपुरोहितः ॥
शौरिर्वृहस्पते श्चोर्ध्वं द्विलक्षे समवस्थितः ।
सप्तर्षिमण्डलं तस्माल्लक्षमेकं द्विजोत्तमाः ॥
ऋषिभ्यस्तु सहस्राणां शतादूर्ध्वं व्यवस्थितः ।
मेढीभूयः समस्तस्य ज्योतिश्चक्रस्य वै ध्रुवः ॥
ध्रुवादूर्ध्वं महर्लोको यत्र ते कल्पवासिनः ।
एक-योजन-कोटिस्तु यत्र ते कल्पवासिनः ॥
द्वे कोटी तु जनो लोको यत्र ते ब्रह्मणः सुताः ।
सनन्दनाद्याः प्रथिथाः मैत्रेयामलचेतसः ॥
चतुर्गुणोत्तरे चोर्ध्वं जनलोकात्तपः स्थितम् ।
वैराजा तत्र ते देवाः स्थिताः सहविवर्जिताः ॥
षड्गुणेन तपोलोकः सत्यलोको विराजते ।
अपुनर्मारका यत्र ब्रह्मलोको हि स स्मृतः ॥ — वि. पु. २-७-५-१५

★